**SA-I (CLASS-VI)** 9/2012

**विषयः संस्कृतं**

**अवधिः - होरात्रयम्** **पूर्णाङ्काः - 80**

**निर्देशाः -**
*(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*(2) प्रतिखण्ड-उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
*(3) प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*(4) प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*(5) प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।*
*(6) सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

**खण्डः - 'क' (अपठित-अवबोधनम्)** **अङ्काः 10**

प्र1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

दशरथस्य चत्वारः पुत्राः आसन्। तेषाम् नामानि रामः लक्ष्मणः भरतः शत्रुघ्नः च आसन्। नृपस्य आज्ञया रामः, लक्ष्मणः सीता च वनम् अगच्छन्। ते चतुर्दश वर्षाणि वनम् अवसन्। तत्र रावणः सीताम् अहरत्। रामः रावणम् अमारयत्। तौ सीताम् अविन्दताम्। अथ तौ सीता च अयोध्याम् आगच्छन्। जनाः तेषां अभिनन्दनम् आचरन्। रामः राज्यम् अविन्दत्। रामस्य राज्ये जनाः प्रसन्नाः आसन्, अतएव रामराज्यं प्रसिद्धम्। सः आदर्शः पुरुषः आसीत्।

I. एकपदेन उत्तरत - (4x½=2)

(i) दशरथस्य कति पुत्राः आसन्?
(ii) रामः कम् अमारयत्?
(iii) रामस्य राज्ये जनाः कीदृशाः आसन्?
(iv) रावणः काम् अहरत्?

II. पूर्णवाक्येन उत्तरत - (2x2=4)

(i) नृपस्य आज्ञया के वनम् अगच्छन्?
(ii) ते कति वर्षाणि वनम् अवसन्?

III. यथानिर्देशं उत्तरत - (4x½=2)

(i) 'अमारयत्' इति क्रियापदस्य किं कर्तृपदम् अस्ति?
(ii) 'चत्वारः पुत्राः' अनयोः पदयोः विशेषणम् पदम् किम् अस्ति?
(iii) 'सः आदर्शः पुरुषः आसीत्'। अत्र 'सः' सर्वनामपदं कस्मै प्रयुक्तम्?
(iv) 'स्वागतम्' पदस्य किम् पर्यायपदं अत्र प्रयुक्तम्?

IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत। (2)

**खण्डः - 'ख' (रचनात्मकं कार्यम्)** **अङ्काः 15**

प्र2. स्वविद्यालयस्य वर्णनं कुर्वन्तः मित्रं प्रति लिखितं पत्रं मञ्जूषातः पदानि चित्वा पूरयत - (10x½=5)

| मञ्जूषा |
|---|
| परीक्षाभवनात्, लेखिष्यामि, पाठयन्ति, विद्यालयः, मित्रम्, योग्याः, सौरभः, अध्यापकाः, कुशलम्, स्वविद्यालयस्य |

(1) ____________

दिनांकः ____________

प्रिय पल्लव

सप्रेमनमः

अत्र (2) ____________ तत्रास्तु। अहम् अधुना (3) ____________ वर्णनं कर्तुम् इच्छामि। मम (4) ____________ अतीव शोभनः विशालः च अस्ति। अस्माकं सर्वे (5) ____________ मनोयोगेन (6) ____________। तेषां योग्यता वस्तुतः प्रशंसनीया। सर्वे छात्राः अपि (7) ____________ सन्ति। विस्तरेण पुनः (8) ____________।

पितृभ्याम नमः।

तव प्रियं (9) ____________

(10) ____________

प्र3. निम्नचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि रचयत - (10)

| मञ्जूषा |
|---|
| स्मरतः, पत्राणि, ईश्वरं, प्रातः कालस्य, वृक्षोपरि, उदयति, खगाः, मेघाः |





**खण्डः - 'ग' (अनुप्रयुक्तव्याकरणम्)** **अङ्काः 25**

प्र4. विशेषण-विशेष्य-सम्बन्धित-नियमं सोदाहरणं स्पष्टं कुरुत। (3)

प्र5. यथानिर्देशम् प्रश्नान् उत्तरत - (4x1=4)

(i) अधिकरण कारके ________ विभक्तिः भवति।

(ii) 'बालकः विद्यालयं गच्छति।' अत्र रेखांकितपदे ________ विभक्तिः अस्ति।

(iii) मोहनस्य गृहम् अत्र अस्ति। अत्र रेखांकितपदे ________ विभक्तिः अस्ति।

(iv) करण कारकस्य चिह्नम् ________ अस्ति।

प्र6. उचितशब्दरूपैः रिक्तस्थानानि पूरयित्वा लिखत - (5x1=5)

(i) सुधा ________ सह गच्छति। (रामेण/रामस्य/रामम्)

(ii) ________ गृहम् दिल्ली नगरे अस्ति। (बालिका, षष्ठी, एकवचन)

(iii) ________ ज्ञानम् भवति। (पुस्तकात्/पुस्तकैः/पुस्तकेषु)

(iv) ________ हसति? (किम्)

(v) सुधीरः ________ नमति? (कम्/केन/कस्य)

प्र7. उचितधातुरूपैः रिक्तस्थानानि पूरयित्वा लिखत - (5x1=5)

(i) छात्रौ पुस्तकं ________। (पठ्)

(ii) श्वः मम मित्रं फलं ________। (नी धातु, लृट् लकार, प्रथम पुरुष, एकवचनम्)

(iii) अश्वाः तीव्रं ________। (धाव् धातु)

(iv) वृद्धः शनैः शनैः ________। (चल्)

(v) आगामी-दिवसेषु वयं पुस्तकानि ________। (पठिष्यामि/पठिष्यामः/पठिष्यन्ति)

प्र8. निम्नवाक्यानि शुद्धं कृत्वा पुनः लिखत - (4x1=4)

(i) जले सुन्दरः कमलं विकसति।

(ii) अहम् फलं खादसि।

(iii) आवाम् विद्यालयं गच्छामः।

(iv) बालिका चलन्ति।

प्र9. अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत - (4x1=4)

(i) हम सब खेलते हैं।

(ii) मैं दौड़ता हूँ।

(iii) तुम क्या पढ़ते हो?

(iv) लड़का लिखता है।

**खण्डः - 'घ' (पठित-अवबोधनम्)** **अङ्काः 30**

प्र10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

एकदा षड्वर्षीयः श्रीकृष्णः वृन्दावने यमुनातटम् अगच्छत्। गोपाः अपि तेन सह अगच्छन्। गोपाः पिपासया आकुलाः अभवन्। ते यमुनाजलम् अपिबन्। जलं पीत्वा ते मूर्च्छिताः अभवन्। श्रीकृष्णः तान् मूर्च्छितान्

दृष्ट्वा व्याकुलः अभवत्। वस्तुतः यमुनाजले कालियनागस्य कुण्डम् आसीत्। तेन यमुनाजलं विषज्वालाभिः विषाक्तम् जातम्। अनेके खगाः पशवः च तत् जलं पीत्वा मृत्युं प्राप्ताः। वायुः अपि तेन विषयुक्तः अभवत्। तेन वायुना वृक्षाः शुष्काः जाताः।

I. एकपदेन उत्तरत - (2x1=2)

(i) के पिपासया आकुलाः अभवन्?

(ii) यमुनाजले कस्य कुण्डम् आसीत्?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) खगाः पशवः च कथम् मृत्युं प्राप्ताः?

(ii) श्रीकृष्णः किमर्थम् व्याकुलः अभवत्?

III. यथानिर्देशम् उत्तरत - (2x½=1)

(i) 'जन्म' शब्दस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(ii) 'अनेके खगाः' अनयोः पदयोः विशेषणपदं किम् अस्ति?

प्र11. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

एकस्मिन् वने शृगालः बकः च निवसतः स्म। तयोः मित्रता आसीत्। एकदा प्रातः शृगालः बकम् अवदत् - "मित्र! श्वः त्वं मया सह भोजनं कुरु।" शृगालस्य निमन्त्रणेन बकः प्रसन्नः अभवत्। अग्रिमे दिने सः भोजनाय शृगालस्य निवासं गच्छति। कुटिलस्वभावः शृगालः स्थाल्यां बकाय क्षीरोदनं यच्छति। बकं वदति च - "मित्र! अस्मिन् पात्रे आवाम् अधुना सहैव खादावः।"

I. एकपदेन उत्तरत - (2x1=2)

(i) शृगालस्य निमन्त्रणेन कः प्रसन्नः अभवत्?

(ii) अग्रिमे दिने सः भोजनाय कस्य निवासं गच्छति?

II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) कुटिलस्वभावः शृगालः स्थाल्यां बकाय किम् यच्छति?

(ii) वने कौ निवसतः स्म?

III. यथानिर्देशम् उत्तरत - (2x½=1)

(i) 'वने' अस्य किम् विशेषणपदम् अत्र प्रयुक्तम्?

(ii) 'गच्छति' इति क्रियापदस्य कर्तृपदम् किम् अस्ति?

प्र12. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

I. एकपदेन उत्तरत - (2x½=1)

(i) केन कार्याणि सिध्यन्ति?

(ii) कस्य मुखे मृगाः न प्रविशन्ति?



II. पूर्णवाक्येन उत्तरत - (2x1=2)

(i) कैः कार्याणि न सिध्यन्ति?

(ii) सिंहस्य मुखे के न प्रविशन्ति?

III. यथानिर्देशम् उत्तरत - (2x1=2)

(i) 'सुप्तस्य सिंहस्य' अनयोः पदयोः विशेषणं पदम् किम् अस्ति?

(ii) 'प्रविशन्ति' अस्य क्रियापदस्य कर्तृपदं किम् अस्ति?

प्र13. श्लोकस्य अन्वयं उचितक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (4)

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥

अन्वयः - धीमताम् (1) _________ काव्यशास्त्रविनोदेन (2) _________ मूर्खाणां च (3) _________ निद्रया (4) _________ वा (गच्छति)।

प्र14. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (4)

(i) प्रार्थना-सभा अतीव मनोरमा अस्ति।

(ii) विद्यालयस्य पुस्तकालयात् छात्राः पुस्तकानि आनयन्ति।

(iii) शृगालः ईर्ष्यया पश्यति।

(iv) अभिवादनशीलस्य चत्वारि वर्धन्ते।

प्र15. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत - (8x½=4)

(i) विद्यालयस्य पुरतः एकम् उद्यानम् अस्ति।

(ii) अन्येभ्यः ग्रामेभ्यः अपि छात्राः अत्र पठनाय समागच्छन्ति।

(iii) उद्यानस्य शोभा अतीव रमणीया अस्ति।

(iv) विद्यालयस्य क्रीडाक्षेत्रम् अतिविशालम् अस्ति।

(v) अस्माकं विद्यालयः ग्रामस्य समीपे अस्ति।

(vi) विद्यया सम्पन्नाः योग्याः छात्राः समाजस्य देशस्य च सेवां कुर्वन्ति।

(vii) ते शिक्षकेभ्यः विविधविषयान् पठन्ति।

(viii) छात्राः क्रीडाकालांशे अत्र क्रीडन्ति।

प्र16. अर्थैः सह शब्दानां मेलनं कृत्वा उत्तरपुस्तिकायां पुनः लिखत - (6x½=3)

| शब्दाः | अर्थाः |
|---|---|
| इदानीम् | वदनं |
| अध्ययनेन | वयः |
| सम्पन्ना | सम्प्रति |
| मुखं | पठनेन |
| अनुग्रहः | युक्ता |
| आयुः | कृपा |